M. T. B. COLLEGE, SURAT

Manuscripts Library

No. Ref.

Ser. 965

Title: Amaru Shatak

965

Complete

C

Amaru Shataka		Title
		Author
		Editor
		Year, Vols.
Sk		Publisher
965		Remarks

मङ्ग्र२

॥०॥श्रीगणेशायनमः॥ज्याकृष्टिबद्धखटिकामुखपाणिपृष्ठप्रेंखन्नखांशुचयसंवलितोंबिकायाः।त्वांपातुमंज
रितपल्लवकर्णपूरलोभभ्रमद्भ्रमरविभ्रमभृत्कटाक्षः॥१॥क्षिप्तोहस्तावलग्नःप्रसभमभिहतोप्याददानोंशुकांतं
गृह्णन्केशेष्वपास्तश्चरणनिपतितोनेक्षितःसंभ्रमेण।आलिंगन्योवधूतस्त्रिपुरयुवतिभिःसास्रनेत्रोत्पलाभि
ःकामीवार्द्रापराधःसदहतुदुरितंशांभवोवःशराग्निः॥२॥आलोलामलकावलींविलुलितांबिभ्रच्चलत्कुंड
सि०१ लंकिंचिन्मृष्टविशेषकंतनुतरैःस्वेदांबुनःसीकरैः।यत्तन्व्यासुरतांततांतनयनंवक्त्रंरतिव्यत्ययेतत्त्वांपातु
चिरायकिंहरिहरब्रह्मादिदेवतैः॥३॥इत्याशीषः॥अलसवलितैःप्रेमार्द्रार्द्रैर्मुहुर्मुकुलीकृतैःक्षणमभिमुखै
र्लज्जालोलैर्निमिषपराङ्मुखैः।हृदयनिहितंभावाकूतंवमद्भिरिवेक्षणैःकथयसुकृतीकोयंमुग्धेत्वयाद्यनिरी
क्ष्यते।४।दूरादुत्सुकमागतेविवलितंसंभाषिणिस्फारितंसंश्लिष्यत्यरुणंगृहीतवसनेकिंचांचितभ्रूलतं।मानि
न्याश्चरणानतिव्यतिकरेबाष्पांबुपूर्णेक्षणंचक्षुर्जातमहोप्रपंचचतुरंजातागसिप्रेयसि।५।इतिलोचनवर्णनं
॥आस्तांविश्वसनंसखीषुविदिताभिप्रायसारेजनेतत्राप्यर्पयितुंदृशंसुरुचिरांशक्नोमिनव्रीडया।लोकोप्येषप
रोपहासरसिकःसूक्ष्मेंगितज्ञोप्यलंमातःकंशरणंव्रजामिहृदयेजीर्णोनुरागानलः।६।वह्नुभीतिप्रसन्नेमनसि १
स्कंदा।पाठः।६

परिचयेविस्मयमानास्तुपायेयातेरागेगुरुत्वंविकसतिसुतरांगौरवेऽवहृतिकायाः।आस्तांदूरेणतावत्सरलसदयि
तालिंगनामंदलास्तस्तद्देहोपांतरथ्याभ्रमणमपिपरांनिर्वृतिंसंतनोति।७।पासादेसापथिपथिचसापृष्ठतःसा
पुरःसापर्यंकेसादिशिदिशिचसातद्वियोगाकुलस्य।हंहोचेतःकिमिदमपराकापितेनास्तिसासासासासासाज
गतिसकलेकोयमद्वैतवादः।८।इतिप्रथमानुरागः॥दीर्घावंदनमालिकाविरचितादृष्ट्यैवनेंदीवरैःपुष्पाणांप्र
करःस्मितेनरचितोनोकुंदजात्यादिभिः।दत्तःस्वेदमुचापयोधरयुगेनार्घोनकुंभांभसास्वैरेवावयवैःप्रियस्यविश
तस्तन्व्याकृतंमंगलं।९।नजानेसन्मुखायातेप्रियाणिवदतिप्रिये।सर्वाण्यंगानिमेयांतिनेत्रतामुतकर्णतां।१०
इतिप्रथमानुरागचेष्टा॥सुप्तोयंसखिसुप्यतामितिगताःसख्यस्ततोनंतरंप्रेमावेशितयामयासरलयान्यस्तंमु
खंतन्मुखे।ज्ञातेलीकनिमीलनेनयनयोर्धूर्तस्यरोमांचतोलज्जासीन्ममतेनसाप्यपहृतातत्कालयोग्यैःक्रमैः।११।
शून्यंवासगृहंविलोक्यशयनादुत्थायकिंचिच्छनैर्निद्राव्याजमुपागतस्यसुचिरंनिर्वर्ण्यपत्युर्मुखं।विस्रब्धंपरिचुं
ब्यजातपुलकामालोक्यगंडस्थलींलज्जानम्रमुखीप्रियेणहसताबालाचिरंचुंबिता।१२।इतिमुग्धानुरागः॥
अरुंतेनाकृताकिमपिकथयामीतिविजनेसमीपेवासीनासरलहृदयासाद्रमय।ततःकर्णोपांतेकिमितिवद वा५

ताम्राय वदनं गृहीता धम्मिल्ले सवसस्विमया गाढमधरे।१३। कांते सागसि शायिते प्रियसखीवेषं विधायागते भ्रांता
लिंग्यमयार हस्यु दितं तत्संगमाकांक्षया।मुग्धे दुष्करमेतदित्यतितरामुद्दामहासं बलादालिंग्य छलिता स्मितेन वि
शृ२ तवेनाघप्रदोषागमे।१४।इतिमुग्धाछलनं।।पटालग्ने पत्यौ नमयति मुखं जातविनया हठाश्लेषं वांछत्यपहरति
गात्राणि निभृतं।न शक्नोत्याख्यातुं स्मितमुखसखीदत्तनयना ह्रियाताम्यत्यंतः प्रथमपरिहासे नववधूः।१५।क
रक्रीडालयं धूर्त्वा धूर्ता विमार्ष्टि वाससी क्षिपति सुमनोमालाशेषं प्रदीपशिखां प्रति।स्थगयति च नः पत्युर्नेत्रे वि
हस्य समाकुलासुरतविरतौ रम्या तन्वी मुहुर्मुहुरीक्षते।१६।इतिमुग्धासंभोगः।।सा पत्युः प्रथमेपराधसमये सखी
पदिष्टं विना नो जानाति सविभ्रमांगवलनावक्रोक्तिसंसूचनं।स्वच्छैरच्छकपोलमूलपतितैः पर्यस्तनेत्रोत्पला बा
ला केवलमेव रोदिति लुठल्लोलालकैरश्रुभिः।१७।इतिमुग्धामानाज्ञानं।।सा यावंति पदान्यलीकवचनैरालीजनैः पा
ठिता तावंत्येव कृतागसो द्रुततरं संलप्य पत्युःपुरः।प्रारंभेपरतो यथा मनसिजस्येयं तथा वर्तितुं प्रेम्णो मौग्ध्यविभूष
णस्य सहजः कोप्येष कांतः क्रमः।१८।इतिमुग्धामानशिक्षा।।मुग्धे मुग्धतयैव नेतुमखिलः कालः किमारभ्यते मानं ध २
त्स्व धृतिं बधान ऋजुतां दूरे कुरु प्रेयसि।सख्यैवं प्रतिबोधिता प्रतिवचस्तामाह भीतानना नीचैः शंस हृदि स्थितो हि न

नु मे प्राणेश्वरः श्रोष्यति।१९।स्फुटतु हृदयं कामः करोति कामं तनुं तनुं न खलु चटुलप्रेम्णा कार्यं पुनर्दयितेन मे।इति
सरभसं मानोद्रेकादुदीर्य वचस्तया रमणपदवी सारंगाक्ष्या ससंभ्रममीक्षिता।२०।इतिमुग्धामानरीतिः।।कांच्या
गाढतरावबद्धवसनप्रांता किमर्थं पुनर्मुग्धाक्षी स्वपितीति तत्परिजनं स्वैरं प्रिये पृच्छति।मातः स्वप्तुमपीह वार
यति मामित्याहितक्रोधया पर्यस्य स्वपनच्छलेन शयने दत्तोवकाशस्तया।२१।इतिमुग्धामानानुशयः।।श्लिष्टः कं
ठे किमिति न मया मूढया प्राणनाथश्चुंबत्यस्मिन्वदनविनतिः किं कृता किं न दृष्टः।नोक्तः कस्मादिति नववधूश्चे
ष्टितं चिंतयंती पश्चात्तापं वहति तरुणी प्रेम्णि जाता रसज्ञा।२२।इतिमुग्धानुशयः।।त्वं मुग्धाक्षि विनैव कंचु
लिकया धत्से मनोहारिणीं लक्ष्मीमित्यभिधायिनि प्रियतमे तद्वीटिकासंस्पृशि।शय्योपांतनिविष्टसस्मितस
खीनेत्रोत्सवानंदितो निर्यातः शनकैरलीकवचनोपन्यासमालीजनः।२३।संदष्टेधरपल्लवे सचकितं हस्ताग्रमा
धुन्वती मामामुंच शठेति कोपवचनैरानर्तितभ्रूलता।सीत्कारांचितलोचना सरभसं यैश्चुंबिता मानिनी प्राप्तं
तैरमृतं श्रमाय मथितो मूढैः सुरैः सागरः।२४।गाढालिंगनवामनीकृतकुचप्रोद्भूतरोमोद्गमा सांद्रस्नेहरसा
तिरेकविगलच्छ्रीमन्नितंबांबरा।मामामानद मातिमामलमिति क्षामाक्षरोल्लापिनी सुप्ता किं नु मृता नु किं मन

न१

सिमेलीना विलीनं नु किं। २५। इति तरुणीसंभोगः॥ सालक्तकेन नवपल्लवकोमलेन पादेन नूपुरवता मदनालसेन। यस्ता- व१
ड्यते दयितया प्रणयप्रकोपात्सोंगीकृतो भगवता मकरध्वजेन। २६। सालक्तकं शतदलाधिककांतिकांतं रत्नौघधाम-
निकरारुणनूपुरांकं। क्षिप्तं पदं प्रकुपितया सरलाय तास्याः सौभाग्यचिह्नमिव मूर्ध्नि चिरं विरेजे। २७। इति तरुणीच-
रणघातः॥ सैवादृष्टमदानृणामनुचितां वेतो यतो नूपुरौ किं वास्माकमवृत्तिरेष सरुजं ब्रीडाधनः स्त्रीजनः। इ-
त्थं निर्दयास्मत्तेरुपगमे स्त्वामेवमत्वा तनुं गन्धावः अथ मंरतिव्यतिकरे संवीक्षितो वध्वस्ता। २८। इति पुरुषायितं।
दंपत्योर्निशि जल्पतोर्गृहशुकेनाकर्णितं यद्वचस्तत्प्रातर्गुरुसंनिधौ निगदितं श्रुत्वैव तारं वधूः। कर्णालंबितपद्म-
रागशकलं विन्यस्य चंचूपुटे ब्रीडार्ता विदधाति दाडिमफलव्याजेन वाग्बंधनं। २९। लोलद्भ्रूलतया विपक्षदिगुपन्यासे
विधूतं शिरस्तद्वृत्तांतनिरीक्षणे कृतनमस्कारो विलक्षः स्थितः। कोपात्ताम्रकपोलभित्तिनि मुखे दृष्ट्यागतः पादयोः संसृष्टो
गुरुसंनिधावपि विधिर्दम्पीन कालोचितः। ३०। इति चातुर्यं॥ आशंक्य प्रणतिं पटांतपिहितौ पादौ करोत्यादराद्व्या-
जेनागतमावृणोति हसितं न स्पष्टमुद्वीक्षते। मय्यालापवति प्रतीपवचनास्सख्यास मंत्राय ते तत्थ्यास्ति हृत्तु निरंत-
ता१ रणयिष्ठानो पिरम्योदयः। ३१। इति मानः॥ परिम्लाने माने मुखशशिनि तस्याः करधृते मयि क्षीणोपाये प्रणिपतनमात्रै- ३

कशरणे। प्रियापक्ष्मप्रांतांबुजपुटनिरुद्धेन सहसा प्रसादो बाष्पेन स्तनतटविशीर्णेन कथितः। ३२। सुतनु जहि-
हि कोपं पश्य पादानतं मां न खलु तव कदापि क्रोप एवं विधोभूत्। इति निगदति नाथे तिर्यगामीलिताक्ष्या नयन-
जलमनल्पं मुक्तमुक्तं न किंचित्। ३३। अंगानामतितानवं कुत इदं कस्मादकस्मादिदं मुग्धे पांडुकपोलमाननमि-
ति प्राणेश्वरे पृच्छति। तन्व्या सर्वमिदं स्वभावत इति व्याहृत्य पक्ष्मांतरव्यापी बाष्पभरस्तया वलितया निश्वस्य मु-
क्तोन्यतः। ३४। इति मानाक्षा॥ दत्तोस्याः प्रणयस्त्वयैव नवतिवेयं विरंलालिता दैवादद्य किल त्वमेव कृतवानस्या
नवं प्रियं। मन्युर्दुःसह एष यात्युपशमं नो सांत्वावादैः स्फुटं हे निस्त्रिंश विमुक्तकंठकरुणं तावत्सखी रोदितु। ३५।
इति सख्युपालंभः॥ बाले नाथ विमुंच मानिनि रुषं रोषान्मया किं कृतं खेदोस्मासु न मेपराध्यति भवान्सर्वे-
पराधामयि। तत्किं रोदिषि गद्गदेन वचसा कस्याग्रतो रुद्यते नन्वेतन्मम का तवास्मि दयिता नास्मीत्यतोरु-
घते। ३६। परस्त्र्या गोत्रस्खलनचकितो दंनतमुखः प्रवृत्तो वैलक्ष्यात्किमपि लिखितुं दैवहतकः। स्फुटो रे-
खान्यासः कथमपि स ताहक्परिणतो गता येन व्यक्तिं पुनरवयवैः सैव तरुणी। ३७। ततश्चाभिज्ञाय स्फुरदरु-
णगंडस्थलरुचा मनस्विन्यारूढप्रणयसहसोद्गद्गदगिरा। अहो चित्रं चित्रं स्फुटमिति निगद्याश्रुकलुषं क-

बाहुलताबंधं मे शिरसि निहितो वामचरणः॥३८॥युग्मं॥ कठिनहृदये मुंच क्रोधं व्यलीककथाश्रितं पिशुनवचनैर्दुःखं
नेतुं न युक्तमिमं जनं। किमिदमथवा सत्यं मुग्धे त्वयाद्य विनिश्चितं यदभिरुचितं तन्मे कृत्वा प्रिये सुखमास्यतां॥
३९॥ स्वं दृष्ट्वा करजक्षतं मधुमदक्षीबा विचार्येर्ष्यया गच्छंती क्व नु गच्छसीति विधृता बालापटांते मया। प्रत्यावृत्त
मुखी सबाष्पनयना मां मुंच मुंचेति सा कोपप्रस्फुरिताधरा यदवदत्तत्केन विस्मार्यते॥४०॥ अनल्पचिंतांतरमो
हनिश्चला विलोक्य मां नैव करोति सा ध्रुवं। स्वभावरोषारतिमात्रभूषणा तनुस्त्वमेवं बत किं न सुंदरि॥४१॥ इति प्रि
येष्टवतिमान विक्लवा कथं विवदंतधृतबाष्पगद्गदं। न किं विदित्वेव जगाद यद्वधूः कियन्न तेनैव तयास्य वर्णितं।
४२॥युग्मं॥ लीलातामरसाहतोन्यवनितानिःशंकदष्टाधरः कश्चित्केसरदूषितेक्षण इव व्यामील्य नेत्रे स्थितः। मु
ग्धा कुड्मलिताननेंदु दधती वायुं स्थिता तस्य सा भ्रांत्या धूर्ततया कपोलफलके तेनानिशं चुंबिता॥४३॥ इति प्रसादनं॥
नवद्य विहितं व्यथयासैरलं प्रिय गम्यतां तनुरपि न ते दोषोस्माकं विधिस्तु पराङ्मुखः। तव यदि तथारूढं प्रेम प्रप
न्नमिमां दशां प्रकृतितरले का नः पीडा गते हतजीविते॥४४॥ प्रातः प्रातरुपागतो सि जनिता निर्निद्रता चक्षुषो मंद
मामम गौरवं व्यपगतं प्रोत्सादितं लाघवं। किं तद्यन्न कृतं त्वया मरणमप्युत्क्रामत्यागम्यतां दुःखं तिष्ठसि यत्र पश्य ४

मधुना तद्विगतः श्रोष्यसि॥४५॥ इति भर्त्सना॥ कथमपि सखि क्रीडाकोपाद्व्रजेति मयोदिते कठिनहृदयस्त्यक्त्वा शय्यां
बलाद्गत एव सः। इति सरभसध्वस्तव्रीडे क्लिष्यमपेतघृणे स्मरं शठमनरपिगतव्रीडं चेतः करोति करोमि किं॥४६॥ च
रणपतनप्रत्याख्यानप्रसादपराङ्मुखे निभृतकितवाचारेत्युक्ते रुषा परुषीकृते। व्रजति रमणे निःश्वस्योच्चै
स्तनाहितहस्तया नयनसलिलच्छन्ना दृष्टिः सखीषु निपातिता॥४७॥ एकस्मिन् शयने विपक्षरमणीनामग्र
हे मुग्धया सद्यः कोपपराङ्मुखं ग्लपितया चाटूनि कुर्वन्नपि। आवेगादवधीरितः प्रियतमस्तूष्णीं स्थितस्तत्
क्षणान्मा भून्मन्युरसौ वसंतदबलितग्रीवं पुनर्वीक्षितः॥४८॥ कथमपिगतअत्यासत्तौ प्रियेस्खलितोत्तरे विरह
कृशया कृत्वा व्याजं प्रकल्पितमश्रुतं। असहनसखीश्रोत्रप्राप्तिप्रमादससंभ्रमं विवलितदृशा शून्ये गेहे
समुच्छ्वसितं पुनः॥४९॥ चिंतामोहविनिश्चलेन मनसा मौनेन पादानतः प्रत्याख्यानपराङ्मुखः प्रियतमो
गंतुं प्रवृत्तोऽधुना। सव्रीडैरलसैर्निरंतरलुठद्बाष्पाकुलैरीक्षणैः श्वासोत्कंपिकुचं निरीक्ष्य सुचिरं जीवेशया वारि
तः॥५०॥ इति प्रत्याख्यानानुताप॥ कोपात्कोमललोलबाहुलतिकापाशेन बद्धा दृढं नीत्वा वासनिकेतनं
दयितया सायं सखीनां पुरः। भूयोप्येवमिति स्खलन्मृदुगिरा संसूच्य दुश्चेष्टितं धन्यो हन्यत एव निह्नुतिप

रः श्रेमान्‌ हसं सारुरन्‌॥५१॥ तस्याः सांद्रविलेपनस्तनयुगप्रश्लेषमुद्रांकितं किं वक्षश्चरणानतिव्यतिकरव्याजेन
गोपायसे। इत्युक्ते क्व तदित्युदीर्य सहसा तत्संप्रमार्ष्टुं मया साश्लिष्टा रभसेन तत्सुखवशात्तन्व्या च तद्विस्मृतं॥५२॥
एकस्मिन्‌ शयने पराङ्मुखतया वीतोत्तरं ताम्यतोरन्योन्यं हृदयस्थितेप्यनुनये संरक्षितो गौरवं। दंपत्योः शनकैर
पांगवलनान्मिश्रीभवच्चक्षुषोर्भग्नो मानकलिः सहासरभसं व्यावृत्तकंठग्रहं॥५३॥ नापेतोनुनयेन यः प्रियसुहृ
द्वाक्यैर्न यः संहृतो यो दीर्घं दिवसं विषह्य विषमं यत्नात्कथं विधृतः। अन्योन्यस्य हृते मुखे विहितयोस्तिर्यक्कथंचि
त्तु द्वयोः स व्याम्याम पि विस्मृतव्यतिकरो मानो विहस्योज्झितः॥५४॥ पश्येयं मयि किंचन घटतश्तिस्थैर्यमयालं विते
किमालपतीसयं खलु शठः कोपस्तयाप्याश्रितः। इत्यन्योन्यविलक्षदृष्टिचतुरे तस्मिन्नवस्थांतरे सव्याजं हसि
तं मया धृतिहरो बाष्पस्तयाप्युज्झितः॥५५॥ इति मानवत्याः॥ तद्वक्त्राभिमुखं मुखं विनिमितं दृष्टिः कृता पादयोस्तस्या
लापकुतूहलाकुलतरे श्रोत्रे निरुद्धे मया। पाणिभ्यां च तिरस्कृतः सपुलकः स्वेदोद्गमो गंडयोः सख्यः किं करवाणि
यांति[illegible]यत्कंचुके संधयः॥५६॥ भ्रूभंगे रचितेपि दृष्टिरधिकं सोत्कंठमुद्वीक्षते रुद्धायामपि वाचि सस्मितमिदं द ५
ग्धाननं जायते। कार्कश्यं गमिते पि चेतसि तनू रोमांचमालंबते दृष्टे निर्वहणं भविष्यति कथं मानस्य तस्मिन्‌ जने॥५७॥

रुद्धा नाम पि यस्य स्फुटघनपुलकं जायतेऽगं समंतात्‌ दृष्ट्वा यस्याननेंदुं भवति बहु रिदं चंद्रकांतानुकारि तस्मि
न्नागस्य कंठग्रहनिकटपदस्थापि निशाणनाथे ममामानस्य चिंतां भवति मयि पुनर्वज्रमय्यां कदाचित्‌॥५८॥
जाता नोत्कलिकास्तनौ न लुलितो गात्रे न रोमांचितं वक्त्रं स्वेदकणांचितं न सहसा यावच्छठेनामुना। दृष्टे नैव मनो ५२
हृतं धृतिमुषा बाणेश्वरेणाधमे तच्छंके नात्र निरूप्यमाणनिपुणेमानः समाधीयतां॥५९॥ निःश्वासा वदनं दहंति हृ
दयं निर्मूलमुन्मूल्यते निद्रा नेति न दृश्यते प्रियमुखं नक्तं दिनं रुध्यते। अंगं शोषमुपैति पादपतितः प्रेयांस्तथोपे
क्षितः सख्यः कं गुणमाकलय्य दयिते मानं वयं कारिताः॥६०॥ अधारस्यपदे प्रियेछनरहं मानस्य वान्यस्य वाग
कीयां विषरूपिणः शठमतेनामापि संक्षेपतः। तन्नैनैव विनाचाशांकधवलास्याटादृहासानिशा एको वा दिव
सः पयोदमलिनो यायान्मम प्रावृषि॥६१॥ चरणपतनसांचालापमनोहरवादवः कलशातरतनो गाढाश्लेषो हग
सखिं बुवनं। इति बद्धफलो मानारंभस्तथापि वनोस्तहे हृदय दयितः कांतः कामं किमत्र करोम्यहं॥६२॥ नूनेदेगुणि
तच्चिरं नयनयोरस्यस्तमामीलनैरोद्धुं शिक्षितमेवरेण हसितं मानेविभोगः स्थितः। धैर्यं कित्तुमपि स्थिरीकृतमिदं चे
तः कथंचिन्मयाबद्धो मानपरिग्रहे परिकरः सिद्धिस्तु दैवे स्थिता॥६३॥ इति मानावाक्तिः॥ अंगुल्यग्रनखेन बाष्पस

लिलं विक्षिप्य विक्षिप्य किंत्वंलीरोदिषि कोपने बहुतरं फूत्कृत्य रोदिष्यसि। यस्यास्ते पिशुनोपदेशवचनैर्मानेति भूमिं
गते निर्विण्णो नुनयं प्रति प्रियतमो मध्यस्थतामेष्यति।६४। लिखन्नास्ते भूमिं बहिरवनतः प्राणदयितो निराहाराः
सख्यः सततरुदितोच्छूननयना। परित्यक्तं सर्वं हसितपठितं पंजरशुकैस्तवावस्था चेयं विसृज कठिने मानम
धुना।६५। नार्यो मुग्धशठा हरंति रमणं तिष्ठंति नो वारितास्तत्किं ताम्यसि किं च रोदिषि मुग्धे तासां प्रियं माकृथा।
कांतः केलिरुचिर्युवा सुहृदयस्ताद्दक्पतिः कातरे किं नो बर्करकर्कशैः प्रियशतैराक्रम्य विक्रीयते।६६। चपल
हृदये किं स्वातंत्र्यात्तथा गृहमागतश्चरणपतितः प्रेमार्द्रः प्रियः समुपेक्षितः। तदिदमधुना यावज्जीवं निरस्तसु
खोद्याः रुदितशरणा दुर्जातिनां सहस्वरुषां फलं।६७। अनालोच्य प्रेम्णः परिणतिमनादृत्य सुहृदस्त्वया कांडे मान
ः किमिति सरले संप्रति धृतः। समाकृष्य ह्येते विरहदहनोद्भासुरशिखाः स्वहस्तेनांगारास्तदलमधुनारण्यरुदितैः।
६८। पादासक्ते सुचिरमिह ते वामता केवकांते मंदारंभे प्रणयिनि जने कोपपराक्षेपरोधः। इत्थं तस्याः परिजनकथा
कोमलैः कोपवेगे बाष्पोद्भेदैस्तत्स्तनसहसा न ज्ञितं न प्रवृत्तं।६९। कपोले पत्राली करतलनिरोधेन मृदिता निपीतो
निश्वासैरयममृतहृद्यो धररसः। मुहुः कंठे लग्नस्तरलयति बाष्पः स्तनतटं प्रियो मन्युर्जातस्तव निरनुरोधे न त्वयं। ६

७०। संत्येवात्र गृहे गृहे युवतयस्ताः पृच्छ गत्वाधुना प्रेयांसं प्रणमंति किं तव धुना दासो यथा वर्तते। आत्मद्रोहिणि दुर्ज
नप्रलपितं कर्णे विधेमा कृथाश्छिन्नस्नेहरसा भवंति पुरुषा दुःखोपचर्याश्छिनः।७१। इति सख्याक्षेपः॥ विरहविष
मः कामो वामः कृशयति तनुं तनुं दिवसगमनादृक्षयायं व्यपेतः प्रणयोयमः। त्वमपि वशगो मानव्याधेर्विचिंतय नाथ
हे किशलयमृदुर्जीवत्येवं कथं प्रमदाजनः।७२। इति सखीवाक्योपन्यासः॥ कृतो दूरादेव स्मितमधुरमभ्युद्गमविधिः शिरस्या
ज्ञान्यस्तात्प्रतिवचनमध्यानतिमति। न दृष्टेः शैथिल्यं मिलित इति चेतो दहति मे निगूढांतः कोपात्कठिनहृदये संवृ
तिरियं।७३। एकत्रासनसंस्थितिः परिहृता प्रत्युद्गमाद्दूरतस्तांबूलाहरणच्छलेन रभसाश्लेषोपि संविघ्नितः। आलापो
पि न मिश्रितः परिजनं व्यापारयंत्यांतिके कांतं प्रत्युपचारतश्चतुरया कोपः कृतार्थीकृतः।७४। इति प्रगल्भामानयु
क्तिः॥ अज्ञानेन पराङ्मुखीं परिभवादाश्लिष्य मां दुःखितां किं लब्धं शठ दुर्नयेन नयता सौभाग्यमेतां दशां। पश्येतद्द
यिताकुचव्यतिकरोन्मृष्टांगरागारुणं वक्षस्ते मलतैलपंकशबलैर्वेणीपदैरंकितं।७५। कोपो यत्र भ्रुकुटिरचना
निग्रहो यत्र मौनं यत्रान्योन्यस्मितमनुनयो दृष्टिपातः प्रसादः। तस्य प्रेम्णस्तदिदमधुना वैशसं पश्य जातं त्वं पादांते
लुठसि न च मे मन्युमोक्षः खलायाः।७६। तयाऽन्यस्मात्कंठग्रहमविच्छिन्नाततस्तिर्यग्यया चैन प्रेयानहमपि हृता त्रा

प्रियतमा।इदानींनाथस्त्वंवयमपिकलत्रंकिमपरंमयाप्तंप्राणानांकुलिशकठिनानांफलमिदं।७७।इदंक्लिष्टंन्तलं
प्रियतमनन्तुन्वेतमथकिंगमिष्यामोयामोननुवयमगमनेनायंनवयं।प्रयायेनैवंमेविरमतुसृताविच्नपदवीसएवा
न्योज्ञातःसखिपरिचिताःकस्यपुरुषाः।७८।इतिसोल्लासवक्रवाक्यानि॥याताःकिंनमिलंतिसुंदरिपुनश्चिंतात्व
यामत्कृतेनोकार्यानितरांकृशासिकथयत्येवंसबाष्पेमयि।लज्जामंथरतारकेणनिपतत्पीताश्रुणाचक्षुषादृष्ट्वामां
हसितेनभाविमरणोत्साहस्तयासूचितः।७९।प्रहरविरतौमध्येवाह्नस्ततोप्यपरेणवाकिमुतसकलेयातेवाह्निप्रिय
त्वमिहैष्यसि।इतिदिनशतप्राप्यंदेशंप्रियस्ययियासतोहरतिगमनंबालालापैःसबाष्पगलज्जलैः।८०।प्रस्थानंव
लयैःकृतंप्रियसखैरस्रैरजस्रंगतंधृत्यानक्षणमासितंव्यवसितंचित्तेनगंतुंपुरः।गंतुंनिश्चितचेतसिप्रियतमेस
र्वेसमंप्रस्थितागंतव्येसतिजीवितप्रियसुहृत्सार्थःकिमुत्यज्यते।८१।लग्नानांशुकपक्ष्मवेल्लुजलतानद्वारदेशोर्पि
तानोवापादयुगेतयानिपतितंतिष्ठेतिनोक्तंवचः।कालेकेवलमंबुदालिमलिनेगंतुंप्रवृत्तःशठस्तन्व्याबाष्पजलौघ
कल्पितनदीपूरेणरुद्धःप्रियः।८२।लोलैर्लोचनवारिभिःसशपथैःपादप्रणामैःप्रियैरन्यास्ताविनिवारयंतिकृपणाःप्रा
णेश्वरंप्रस्थितं।पुण्याहंसुदिवसंव्रजमंगलंप्रातःप्रयातस्यतेयत्स्नेहोचितमीहितंप्रियमयातन्निर्गतःश्रोष्यसि।८३। ८

दृष्टःकातरनेत्रयाचिरतरंबद्धांजलियाचितःपश्चादंशुकपल्लवेपिविधृतोनिर्व्याजमालिंगितः।इत्याक्षिप्य
यदासमस्तमघृणोगंतुंप्रवृत्तःशठःपूर्वंप्राणपरिग्रहोदयितयामुक्तस्ततोवल्लभः।८४।यास्यामीतिसमु
द्यतस्यगदतोविस्रब्धमाकर्णितंगच्छन्दूरमुपेक्षितोमुहुरसौव्यावृत्यतिष्ठन्नपि।तच्छून्येपुनरास्थितास्मिभु
वनेप्राणास्तएतेदृढाःसख्यस्तिष्ठतजीवितव्यसनिनीदंभादहंरोदिमि।८५।इतिप्रवत्स्यवासः॥धीरंवारिधर
स्यवारिकिरतःश्रुत्वानिशीथेध्वनिंदीर्घोच्छ्वासमुदश्रुणाविरहिणींबालांचिरंध्यायता।अध्वन्येनविमुक्तकंठम
खिलांरात्रिंतथाक्रंदितंग्रामीणैःपुनरध्वगस्यवसतिर्ग्रामेनिषिद्धायथा।८६।मलयमरुतांव्राताव्राताविक
सितमल्लिकापरिमलभरोभग्नोग्रीष्मस्त्वमुत्सहसेयदि।घनघटयितुंतंनिःस्नेहंयएवनिवर्तनेप्रभवतिगवां २५
किंनछिन्नंसएवधनंजयः।८७।रावोवारिस्तिरालसोंबुदरवोदिग्भ्रेनजाताक्षणंपांथेनात्मवियोगदुःखपिशु
नंगीतंतथोत्कंठया।आस्तांजीवितहारिणःप्रवसनालापस्यसंकीर्तनंमानस्यापिजलांजलिःसरभसंलोकेन
दत्तोयथा।८८।आदृष्टिप्रसरात्प्रियस्यपदवीमुद्वीक्ष्यनिर्विण्णयाविश्रांतेषुपथिष्वहःपरिणतौध्वांतेसमुत्सर्प
ति।दत्त्वैकंसशुचागृहंप्रतिपदंपांथस्त्रियास्मिन्क्षणेमाभूदागतइत्यमंदवलितग्रीवंपुनर्वीक्षितं।८९।आ

लोक्यांगणवाटिकापरिसरे चूतद्रुमे मंजरीसर्पत्सांद्रपरागलंपटरणद्भृंगांगनाशोभिनी। मन्येस्वांतमुत्तरीयवा
कलेनाग्रघबालास्फुरत्कंवध्नन निरोधकंपितकुचश्वासोद्गमं रोदिति।९०। कृत्वा कस्मान्निशीथे घनरववरसितं
विश्वस्थांगंपतंतासाशय्यायाम्म्लिष्टेन तकरस्तंतया दुःखितालीजनेन। सोत्कंपमुत्कंकंवकविनकैचतदापातनं
र्णत्क्र बिंदुस्मृत्वास्मृत्वाप्रियस्यस्वखितमृदुवचोरुघते पांथवध्वा।९१। तन्मे महाविरहवह्निशिखावलीभिराप
रुस्तनतटे हृदये प्रियायाः। मन्मार्गवीक्षणनिवेशितदीनदृष्टेर्नूनं छमिछमिति बाष्पकणाःपतंति।९२। तन्वंग्या
गुरुसंनिधौ नयनयोर्यद्वारिसंस्तंभितं तेनांतर्गलितेन मन्मथशिखी सिक्तो वियोगोद्भवः। मन्ये तस्य विशीर्यमाण
किरणस्यैषामुखेनोद्गताश्वासायाससमाकुलालिसरणिव्याजेन धूमावली।९३। देशैरंतरिताशतैश्चसरितामुर्वी
भृतां काननैर्यत्नेनापि नयाति लोचनपथं कांतेति जानन्नपि। उद्ग्रीवश्चरणार्धरुद्धवसुधः प्रोन्मृज्य सास्रे दृशौ तामा
शांपथिकस्तथैव किमपि ध्यायंश्चिरं वीक्षते।९४। इतिगृहपतिप्रवासः॥ वरमसौ दिवसो न पुनर्निशा ननु निशैव वरं
न दिवं। उभयमेततुपैत्वथवाक्षयं प्रियजनेन न यत्र समागमः।९५। इतिप्रवासचिंता॥ विरविरहिणोत्कंठोत्कंठवाति
सर्यीकृतगात्रयोर्नवमिवजगज्जातंभूयश्चिराद्भिनंदतोः। कथमपि दिने दीर्घे याते निशामधिरूढयोः प्रसरतिक ८

था वक्तीस्तनोर्यथा न तथा रतिः।९६। आयाते दयिते मनोरथशतैर्नीत्वा कथंचिद्दिनं वैदग्ध्यापगमाज्जडे परिजने
दीर्घां कथां कुर्वति। दष्टास्मीत्यभिधाय सत्वरपदं व्याधूय चीनांशुकं तन्वंग्या रतिलालसेन मनसा नीतः प्रदीपः शमं।
९७। ग्लानं पांडुकृशं वियोगविधुरं लंबालकं सालसं भूयस्तत्क्षणजातकांतिसरसं प्राप्ते मयि प्रोषिते। सोटोपं रतिके
लिकालरभसं रम्यं किमप्यादरात् यत्पीतं सुतनोर्मया वदनकं तत्केन विस्मार्यते।९८। इतिप्रवासागमसंगमः॥ दृष्ट्वै
कासनसंस्थिते प्रियतमे पश्चादुपेत्यादरादेकस्या नयने निमील्य विहितक्रीडानुबंधछलः। तिर्यग्वक्रितकंधरः सपु
लकः प्रेमोल्लसन्मानसामंतर्हासलसत्कपोलफलकां धूर्तोपरां चुंबति।९९। गाढाश्लेषविशीर्णचंदनरजःपुंजप्रसं
गादियं शय्या संप्रति कोमलांगि परुषेत्यारोप्य मां वक्षसि। गाढोष्ठग्रहदष्टवामाकुलतया पापादयं संदंशादिनात्मनो
वरमात्मनोपहृतवितं धूर्तेन तत्सस्मितं।१००। इतिप्रियकौशलं॥ उरसि निहितस्तारो हारः कृता जघने घने कलकल
वती कांची पादौ रणन्मणिनूपुरौ। प्रियमभिसरस्येवं मुग्धे त्वमाहतडिंडिमा यदि किमधिकत्रासोत्कंपं दिशः समुदी
क्षसे।१०१। इतिसखीसारिकाशिक्षा॥ गते प्रेमाबंधे प्रणयबहुमाने विगलिते निवृत्ते सद्भावे जन इव गते गच्छति पुरः। तदुत्
प्रेक्ष्योत्प्रेक्ष्य प्रियसखि गतांस्तांश्च दिवसान्न जाने को हेतुर्गलति शतधा यन्न हृदयं।१०२। चिरप्रेमणि ईर्ष्याभिजोरा।

गोदयः॥१॥ मंदंमुज्झितमांसवः शिथिलितकेशैरुलसन्मालोकिताव्यक्तायासरुदद्दृग्भिर्हरिणीश्वासानिर्लज्जैर्जरिः। ए
तैतेनिपतंतिनूतनघनानूआवृष्टेभ्रराररंग्निणो विभायीकृतविश्वयुक्तवनितावक्त्रेंदवो बिंदवः।१०३। किंचिन्मुञ्जि
तमांसवःपरिपततूर्णंकारिणो मरुद्वेगव्यस्तकुटीरकायनिपततु बिंदवो लक्षांतराः। कर्मव्यग्रकटं बिनीकृ
वश्रमरस्वेदबिंदःआवृषःआरंभेमदयंति कंदलदलौ श्वासाःपयो बिंदवः।१०४। इतिवर्षावर्णनं॥२॥ अगंचंदनपं
कुपल्लवमृदुस्तो लतास्रोधरोध्मरायंत्रजलाभिषेककलुषेभ्रैताञ्जनेजोवने। अंतःपुष्पसुगंधिताद्ध्रकवरीस्तन
तनीयोंशुकंकांतानांकमनीयतांविदधतिग्रीष्मोपचाराइमे।१०५। इतिग्रीष्मवर्णनं॥३॥ नीचोभ्वैर्निक्षिप्तंतरंगे
तउहिनकणासारराकान्परागान्कौंदानानंदितालीनतिक्तरसुरन्नीन्मूरिशो दिग्मुखेषु। एतेते अंककं मा
कस्तनकलशातटास्फालनापुरुभ्रवंतःपीचासीकारिवक्त्रहरिणविशुद्धात्रांतैमनावांतिवाताः।१०६। रामा
णांरमणीयवक्त्रशशिनःस्वेदोदबिंदून्धयन्व्यालोलालकवल्लरीःप्रचलयन्धुन्वन्नितंबांशुकं। प्रा
तर्वातिनवातिफुल्लविकसत्राजीवराजीरजःपुंजामोदमनोहरोरतिरसग्लानिंहरन्मारुतः।१०७। लल
नालोलप्रम्भिद्ध्रमल्लिकामोदजालिताः। वांतिरात्रौरतिक्लांतकामिनीसुरुहो निलाः।१०८। वांति कल्लार ९

सुगंगाःसप्तच्छदमरीचयः। वाताः नवरतस्नानवधूगमनमंथराः।१०९। इतिवायुवर्णनं॥४॥ साबालावं
यमध्रुगल्भमनसः सास्त्रीवयं कातराः सापीनोन्नतिमत्पयोधरयुगंधत्तेसखेदावयं। साक्रांताजघनस्थ
लेनगुरुणागंतुंनशक्तावयं। दोषैरन्यगुणाश्रयैरपटवोजाताःस्म इत्यद्भुतं।११०। इयमसौतरलायित
लोचनागुरुसमुन्नतपीनपयोधरा। पृथुनितंबभरालसगामिनी प्रियतमामममजीवितहारिणी।१११
पीतोयतः प्रभृतिकामपिपासितेन तस्यामयाधररसःप्रचुरःप्रियायाः। तृष्णाततःप्रभृतिमेद्विगुणत्वमे
तिलावण्यमस्तिबहुतत्रकिमत्रचित्रं।१२। त्वाद्यालक्ष्मललाटपट्टमभितःकेयूरमुद्रागलेवक्त्रेकज्जलका
लिमानयनयोस्तांबूलरागोवरः। दृष्ट्वाकोपविधायिमंडनमिदंप्रातश्चिरं प्रेयसोलीलातामरसोदरेमृग
दृशःश्वासाःसमाप्तिंगताः।१३। कथयस्थितासिकस्तोरुघनेनिशीथेप्राणाधिपोवसतियत्रमनःप्रियोमे। ए
काकिनीवदकथंनबिभेषिबालेनन्वस्तिपुंखितशरोमदनःसहायः।१४। आश्लिष्टारभसादिलीयतइव
त्वांगेष्वनंगेनयाप्यस्याःकृत्रिमचाटुकारकरणाच्चूतेनखिन्नंमनः। कोहंकायमितिप्रवृत्तसुरतावेत्तीवयानां
तरान्यंततःसारमणीसएवरमणोक्षेत्रोजायापती।१५। साकांताकबरीवरंतदलकंतेलोचनेतेस्तनौसानास

सकपोलकांतिविनवोदंतछदःसछविः। तौदोवल्लिरिकालसत्किसलयाकारौ करौ कोमलौ सामीनोन्नति
मंडलाकृवत्तटी मध्येतत्तानवं।१६।सा रम्या त्रिवलीससुंदरतरो रोमावली विभ्रमःसा तोगःस नितंब
बिंबविनवस्तकौरवस्वंवभ्रः।सा पादांबुजयोरलक्तकलिपिलीलालसा साग तिस्ताःक्रीडालडजा
तरालससरलाःकंदर्पवक्रोक्तयः।१७।सानंदंसमदंसविभ्रमतरंसा पत्रपंसाग्रहंसस्नेहंसमनोहरंसरस
संसांतःस्मितंसाद्भुतं।साकांक्षंसरसंसगाढपुलकंसप्रेमकौतूहलंनीरंग्या विवरार्पितंकुलवधूलीलाक
टाक्षंस्मरः।१८।सजीवतुविरंरंगीनीरंगी।विवरेणयः।धृतरंगाकुरंगाक्षीसमंदाक्षंसमीक्षते।१९।एषा
काप्रस्तुतांगीप्रचालितनयनाहंसलीलावजंती दौपादौकुंकुमाद्वैर्दिनकविरचितौन्पुरौ द्राहयंती।ह
स्तेनोल्लासयंती बकुलकुसुमलतानवबवेणीरलंती ताम्बूलं वामहस्ते मदनगतिवरा कर्णशालांप्र.विष्टा।
२०।कुचावालोक्यतन्वंग्याःशिरःकंपयतेयुवा।तयोरंतरनिर्मग्नांदृष्टिमुत्पाटयन्निव।२१।